Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 5 | ISSN : 2581- 6306

# स्कन्दपुराणे शिवपूजापद्धतिः

पल्लव: मण्डल:
गवेषक:,(Ph.D), संस्कृतविभाग:, तिलका–माझीँ–भागलपुर–विश्वविद्यालय: भागलपुरम्, विहारप्रदेशम्

**Article Info**
Volume 5, Issue 5
Page Number : 26-32

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Sep 2022
Published : 10 Sep 2022

**सारांश:-** कर्मकाण्डस्य उत्पत्ति: अनादिकालात् जातास्ति। तथा अनेन कार्मकाण्डेन अद्य सनातनधर्मस्य रक्षा भवति। कर्मकाण्डं ज्ञात्वा भवान् पूजाया: विषये परिचित: भविष्यति यत् पूजाया: प्रयोजनं किमस्ति, तथा तस्या: महत्वं किमस्ति, सर्वेषां वर्णनं समूहेऽस्मिन् साधितमस्ति। अत मया सारल्येन एतेषां विवरणं प्रदाय विशेषतया शिवपूजापद्धति: वर्णिता:।

**विशेषशब्दा:**– वैदिकीपूजा, तान्त्रिकीपूजा, पञ्चपल्लवम्, सप्तधान्यानि, दशमहादानम्, देवपूजने विशेष:, शिवपूजापद्धति:, पुरातनजलस्य पुष्पस्य च निषेध:, दीपनिर्वापणस्य दोष:, देवानां प्रियं पत्रं पुष्पञ्च इत्यादय:।

प्रत्येकं पूजनस्य प्रारम्भे आत्मशुद्धि:, गुरुस्मरणं, पवित्रधारणं, पृथ्वीपूजनं, संकल्पं, भैरवप्रणामं, दीपपूजनं, शंखघण्टापूजनं तत्पश्चात् देवपूजनं करणीयमस्ति। व्रतोद्यापनसमये तथा विशेषानुष्ठानसमये यज्ञपीठस्थापनाया: विशेषवैशिष्ट्यं भवति, अत: प्रधानदेवताया: पीठरचना पूर्वदिशि करणीया भवति। पीठरचनार्थं विविधवर्णानाम् अक्षतानां तथा अन्नादिनां प्रयोग: भवति। सर्वव्रतोद्यापने सर्वतोभद्रपीठं विशेषरूपेण निर्मियते।

पूजनस्य नानाप्रकारा: प्रचलिता: सन्ति एवञ्च शास्त्रे पञ्चोपचार: षोडशोपचार: शतोपचार: इत्यादिविविधवस्तुना अर्चनाविधे: विधानानां विस्तरस: वर्णना कृता वर्तते। श्रद्धाभक्त्यनुसारेण तेषां संग्रह: करणीय: वर्तते। प्रत्येकं पूजनस्य प्रारम्भे आत्मशुद्धि: गुरुस्मरणं पवित्रधारणं पृथ्वीपूजनं सङ्कल्पं भैरवप्रणामं दीपपूजनं शङ्खघण्टापूजनं तत्पश्चात् देवपूजनं करणीयमस्ति। व्रतोद्यापनसमये तथा विशेषानुष्ठानसमये यज्ञपीठस्थापनाया: विशेषवैशिष्ट्यं भवति, अत: प्रधानदेवताया: पीठरचना पूर्वदिशि करणीया भवति। पीठरचनार्थं विविधवर्णानाम् अक्षतानां तथा अन्नादिनां प्रयोग: भवति। सर्वव्रतोद्यापने सर्वतोभद्रपीठं विशेषरूपेण निर्मियते।

पूजनस्य नानाप्रकारा: प्रचलिता: सन्ति एवञ्च शास्त्रे पञ्चोपचार: षोडशोपचार: शतोपचार: इत्यादिविविधवस्तुना अर्चनाविधे: विधानानां विस्तरस: वर्णना कृता वर्तते। श्रद्धाभक्त्यनुसारेण तेषां संग्रह: करणीय: वर्तते।

### ❖ देवार्चनहेतुकानि विशिष्टद्रव्याणि

**पञ्चामृतम्** – घृतं, दुग्धं, दधि:, वेर:, मधु।

**पञ्चगव्यम्** – गोमलं, गोमुत्रं, गोदुग्धं, गोघृतं,गोदधि:।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**पञ्चरत्नम्** – माणिक्यं, पन्ना, पूष्परागः, प्रबालः, मोक्तिकम्।

**पञ्चपल्लवम्** – पीप्पलम्, आम्रं, उडुम्वरः, वटः, अशोकः।

**सप्तमृत्तिका** – गजस्थानम्, अश्वः, बल्मीकः, वर्मी, नदीसङ्गमं, गोशाला, राजद्वारः।

**सप्तधान्यानि** – माषः, मुद्गः, गोधूमः, चणकं, ब्रीहिः, यवः, कंगुः।

**सप्तधातवः** – सुवर्णः, रजतं, ताम्रं, लौहः, त्रपुः, सीसकम्, आर्कुचम्।

**अष्टमहादानम्** – कर्पासः, लवनं, घृतं, सप्तधान्यानि, स्वर्णं, लौहं, भूमिः, गोदानम्।

**अष्टाङ्गार्घ्यम्** – जलं, पुष्पं, कुशाग्रं, दधिः, ब्रीहिः, केसरं, दूर्वा, पूगीफलं, दक्षिणा।

**दशमहादानम्** – गोदानं, भूमिदानं, तिलदानं, स्वर्णदानं, घृतदानं, वस्त्रदानं, धान्यदानं, गुडदानं, रजतदानं, लवनदानम्।

**पञ्चोपचारः** – गन्धं, पुष्पं, धूपं, दीपं, नैविद्यम्।

**पञ्चदेवाः** – सूर्यः, गणेशः, शक्तिः, शिवः, विष्णुः।

**सप्तपातालः** – तलम्, अतलं, सुतलं, वितलं, तलातलं, रसातलं, पातालम्।

**सप्तद्वीपाः** – जम्बु, प्लक्षः, शाल्मली, कुशः, क्रौञ्चं, शाकं, पुष्करम्।

**जम्बुद्वीपम्** – इलावृत्तम, भद्राश्वः, हरिवर्णः, केतुमालः, रम्यकः, हिरण्यमयः, कुरुः, किंपुरुषः, भारतवर्षः।

**पुरातनजलस्य पुष्पस्य च निषेधः** – यत् पुष्पं पत्रं जलं वा पुरातनं जातमस्ति तत्सर्वं देवोपरि न प्रदेयम्, केवलं तुलसीदलं गङ्गाजलं वा कदापि पुरातनं न भवति। तीर्थस्यापि जलं कदापि पुरातनं न भवति। वस्त्रे यज्ञोपवीते आभूषणेऽपि निर्माल्यादेशः न भवति। उद्यानपालकस्य गृहे स्थापितानि पुष्पाणि कदापि पुरातनानि न भवन्ति। जले निमज्य पुष्पाणां परिष्करणं निषिद्धमस्ति, केवलं जलस्य प्रोक्षणं कर्तुं शक्यते। पद्मस्य कलिं विहाय अपरस्य कलेः स्थापनं निषिद्धमस्ति। पुष्पाणि पत्राणि फलानि च यथा आविर्भूताः भवन्ति तथैव प्रदेयानि भवन्ति। उत्पन्नकाले एतेषां मुखानि उपरितः भवन्ति, अतः एतेषां मुखानि उपरितः स्थापनीयानि। दूर्वादलं तुलसीदलञ्च स्वस्य दिशि तथा विल्बपत्राणि अधः करणीयमस्ति। एतद्भिन्नपत्राणि यथाकथञ्चित् स्थापयितुं शक्यते। दक्षिणहस्तस्य करतलं उत्थाप्य मध्यमायाः अनामिकायाः वा अङ्गुल्याः साहाय्येन पुष्पं प्रदेयम्। प्रदत्तं पुष्पं अङ्गुष्ठेन तर्जन्या वा अपसारणीयमस्ति।

❖ **देवानां पूजनं स्थानञ्-** पञ्चदेवानां (सूर्यः, गणेशः, दूर्गा, शिवः, विष्णुः) पूजनं सर्वेषु कार्येषु करणीयमस्ति। गृहे एकस्याः मूर्ते पूजनं न करणीयं अपि तु नैकेषां मूर्तीनां पूजनं करणीयम्। एतेन कामनापूर्तिः सम्भवति। गृहे शिवलिङ्गद्वयस्य, गणेशत्रयस्य, शङ्खद्वयस्य, सूर्यद्वयस्य, दूर्गात्रयस्य, गोमतीचक्रद्वयस्य, शालिग्रामशिलाद्वयस्य च पूजनेन गृहस्थस्य मनुष्यस्य कदापि कल्याणं न सम्भवति। शालिग्रामस्य कदापि प्राणप्रतिष्ठा न भवति। बाणलिङ्गं लोकत्रये विख्यातमस्ति, तस्य प्राणप्रतिष्ठा, संस्कारः आह्वानं वा कदापि किमपि न भवति। प्रस्तरस्य काष्टस्य सुवर्णस्य धातोः वा मूर्तेः प्रतिष्ठा गृहे मन्दिरे वा करणीया अस्ति। कुमकुमेन केसरेण कपूरेण सह चन्दनं पुष्पमित्यादिकं ताम्रपात्रे स्थापनीयमस्ति। तृणं काष्ठं पत्रं प्रस्तरं इष्टिका इत्यादिना आच्छादितस्य सोमसूत्रस्य लङ्घनं कर्तुं शक्यते। पूजायां येषां द्रव्याणां अभावः भवति

तेषां पूर्ती मनसा चिन्तनं करणीयमस्ति अथवा तस्य द्रव्यस्य स्थाने अक्षतपुष्पं वा जलं वा स्थापयितुं शक्यते – तत्तत् द्रव्यं तु सङ्कल्पस्य पुष्पैर्वापि समर्चयेत्। अर्चनेषु विहीनं यत् तत्तोयेन प्रकल्पयेत् केवलं नैवेद्यं संस्थाप्य अथवा केवलं चन्दनं पुष्पञ्च संस्थाप्य पूजा करणीया अस्ति।

**केवलनैवेद्यसमर्पणेव पूजासिद्धिरिति....।**

**गन्धपुष्पसमर्पणमात्रेण पूजासिद्धिरित्यपिपूर्वैः...॥**[1]

❖ **पूजासमये प्रयोज्यमानमुचितमासनम्-** कुशासनं कम्बलासनं मृगचर्मासनं व्याघ्रचर्मासनं रेशमासनं वा जपस्य कृते उत्तमासनमस्ति। वंशनिर्मिते मृत्तिकानिर्मिते प्रस्तरनिर्मिते तृणनिर्मिते गोमलनिर्मिते पलाशनिर्मिते पिप्पनिर्मिते वा लौहकीलकुयक्ते आसने कदापि न उपवेशनीयम्। तथा गृहस्थजनाः मृगचर्मासने कदापि मा उपविशन्तु। शिखाबन्धनं विना स्नानं दानं जपं होमं सन्ध्यावन्दनं तथा देवार्चनं वा न करणीयम्।

❖ **गणेशस्य विष्णोः शिवस्य देव्याः च पूजायाः विशिष्टाः नियमाः**

1. अङ्गुष्ठेन देवस्य कदापि मर्दनं न करणीयं तथा कदापि अधमपुष्पेण पूजनं न करणीयं, कुशाग्रेण कदापि जलप्रोक्षणं न करणीयम्, एवं करणीयं तु वज्रपातसमानं भवति।
2. अक्षतेन विष्णोः, तुलसी इत्यनेन गणेशस्य, दुर्वा इत्यनेन दूर्गायाः तथा विल्बपत्रेण सूर्यस्य पूजनं न करणीयमस्ति।
3. अधोवस्त्रे स्थापितेन जलेन पूष्पाणां प्रोक्षणं क्रियते चेत् तानि पुष्पाणि द्वाः कदापि न स्वीकुर्वन्ति।
4. शिवस्य कृते कुन्दपुष्पं, विष्णोः कृते धत्तुरापुष्पं, देव्ययाः उपरि अर्कस्य तथा सूर्यस्य कृते तगरपुष्पस्य प्रदानं न करणीयम्।
5. पत्रं पुष्पं वा विपरीतक्रमेण न स्थापनीयं, पत्रं पुष्पं वा यथा ऊर्द्धमुखेन आविर्भूताः भवन्ति, तथैव अर्पनीयाः भवन्ति। केवलं विल्बपत्रमेव विपरीतक्रमेण स्थापयितुं शक्यते।
6. पत्रस्य मूलभागस्य अग्रभागस्य जीर्णपत्रस्य तथा शिरयुक्तस्य स्थापनेन क्रमशः व्याधिः पापं आयुक्षयः तथा बुद्धेः नाशः सम्भवति।
7. नागरबिल्बपत्रस्य दण्डव्याधिः तथा अग्रभागेन पापं भवति, नष्टं ताम्बुलं आयुषं तथा शिरा बुद्धेः नाशं करोति। अतएव दण्डस्य अग्रभागस्य शिरायाः निष्काशनं करणीयमस्ति।
8. संक्रान्तिसमये, द्वादशीतिथौ, अमावस्यायां, पूर्णिमायां, रविवासरे, सन्धायां च तुलसीलवनं निषिद्धमस्ति। यदि विशेषरूपेण प्रयोजनं भवति (भगवतः विष्णोः पूजनहेतोः) तर्हि अधोल्लिखितेन मन्त्रेण अथवा भगवतः विष्णोः स्मरणेन वा लवनं करणीयमस्ति।

**त्वदङ्गसंभवेन त्वां पूजयामि यथा हरिम् ,**

**तथा नाशय विघ्नं मे ततो यान्ति परां गतिम्।**[2]

चरणामृतग्रहणविधिः (वारत्रयम्) – वामहस्ते वस्त्रं स्वीकृत्य दक्षिणहस्तं संस्थाप्य तत्पश्चात् चरणामृतं स्वीकृत्य पेयमस्ति। चरणामृतपानकाले उच्चारणीयः मन्त्रः –

**कृष्ण! कृष्ण! महाबाहो! भक्तानामार्तिनाशनम्।**

**सर्वपापप्रशमनं पादोदकं प्रयच्छ मे॥**[3]

चरणामृतपानसमये उच्चारणीयः मन्त्रः –

**अकालमृत्युहरणं सर्वव्याधिविनाशनम्।**

**विष्णुपादोदकं पीत्वा पुनर्जन्म न विद्यते।।**

**दुरूखदौर्भाग्यनाशाय सर्वपापक्षयाय च।**

**विष्णो पञ्चामृतं पीत्वा पुनर्जन्म न विद्यते।।**[4]

❖ **देवपूजने विशेषः**

1. द्रोणपुष्पस्य महत्वम् – ब्रह्मा विष्णुः शिवः प्रभृतयः द्रोणपुष्पम् अत्यन्तं प्रीणन्ति। सर्वकामनानां तथा अर्थस्य सिद्धये एतत् पुष्पं दूर्गायै प्रदेयमस्ति।

2. कस्य देवस्य कीयद्वारं प्रदक्षिणं करणीयमस्ति – चण्ड्याः एकवारं, सूर्यस्य सप्तवारं, गणेशस्य वारत्रयं, विष्णोः वारचतुष्टयं तथा भगवतः शिवस्य अर्धप्रदक्षिणं करणीयमस्ति।

3. दीपनिर्वापणस्य दोषः – देवानां पूजायां स्थितस्य दीपस्य निर्वापणं दूरीकरणं वा न करणीयं यतो हि दीपस्य हारकः जनः अन्धः भवति। अर्थात् दीपस्य निर्वापकजनः दृष्टिहीनः भवति।

4. देवानां प्रियं पत्रं पुष्पञ्च – भगवतः शिवस्य प्रियं पत्रमस्ति विल्बपत्रम्, विष्णोः प्रियं पत्रं भवति तुलसीपत्रं, गणेशस्य प्रियं पत्रं भवति दूर्वतृणम्, अम्बाजी विभिन्नप्रकारस्य पुष्पं तथा भगवतः सूर्यस्य रक्तवर्णस्य करवीरपुष्पम् अत्यन्तं प्रियमस्ति।

❖ **शिवपूजापद्धतिः**

**संसारसागरेऽगाधे दुःखावर्तशताकुले।**

**मज्जतां मनुजानां वै पूजामाहेश्वरस्य नौः।।**

शिवपूजापद्धतिर्नाम शिवरूपिणः इष्टलिंगस्य अर्चनक्रम एव। सा च शिवपूजा महतीगुर्वीलघ्वीति त्रिधाभिध्यते उत्तममध्यमाधमरुपसाधकभेदात् अर्चनोपचारभेदाच्च।

**शृणुरुद्रप्रवक्ष्यामि पूजाभेदाननुत्तमम्।**

**पूजाहि त्रिविधा प्रोक्ता गुर्वी च महतीलघुः।।**

**महतीमुत्तमः कुर्यात् गुर्वी मध्यम एव च।**

**लघ्वीमशक्तः कुर्यात् सायं मध्याह्नकालयोः।।**[5]

अत्रापि उत्तममध्यमाधमपदानां निराभारिविशेष सामान्यवीरशैवा इत्यप्यूहितुं शक्यते। अत्रोक्ताः पूजाः तिस्रः सायंमध्याह्नकालीनाः। अपि च तद्भिन्ना प्रातः करणीया अवसराख्या पूजाप्युक्ता। अतः आहत्य शिवपूजा चतुर्धा।

प्रत्यहं भक्तिशालिभिः उत्तमैः षट्कालं त्रिकालं वा पूजा करणीया।

**अरुणस्योदये सूर्यस्योदये संगवे तथा।**

**मध्याह्ने च ततः सायमर्धरात्रे च सुव्रते।।**

**उत्तमैर्श्वनीयोऽहं षट्कालं भक्तिशालिभिः।**

**महतीं वा गुरुं वापि लघ्वी वा यत चेतनः।।**

**कालेषु षट्सु पूज्योऽहं त्रिसंध्यमथवा पुनः॥** [6]

उत्तमानां षट्कालं, मध्यमानां त्रिकालं, सामान्यानां कृषिककर्मचार्यादीनां एकवारं नियतमिति विधीयते।

❖ **वैदिकी तान्त्रिकी च पूजा-** शिवपूजापद्धतिरियं पुनरपि द्विधा भवति, वैदिकी-तान्त्रिकीति। प्रथमा वेदविदांवराम्। द्वितीया तु वेदाऽनभिज्ञानां स्त्रीमुख्यानाम्। वेदमन्त्रसमन्विता वैदिकी। वेदमन्त्ररहिता तान्त्रिकी। लिङ्गज्ञानमर्थज्ञानमाश्रित्यैव अभिषेकार्चनोपचारेषु वेदमन्त्राः नियोजिताः वैदिक्याम्। तथैव केवलं आगमश्लोकाः नियोजिताः तान्त्रिक्याम्। उदाः वैदिक्यां गन्धधारणे **"गन्धद्वारां सुराधर्षा"** इति वेदमन्त्रः नियोजितः। तान्त्रिक्यां तु कामाङ्गभसितालेपसमुज्वलशुभांगक सुगन्धीचन्द्रसंबन्धः श्रीगन्धः प्रतिगृह्यताम्। इत्यागमश्लोकः नियुक्तः।

**तान्त्रिकी पूजायां कश्चन विशेषः अस्ति च।**
**सर्वेषामधिकारोऽस्ति तान्त्रिकेषु वरानने॥**
**वैदिकानां तथान्येषां स्त्रीणां पुंसां च सुव्रते।**[7]

तान्त्रिकपूजेयं स्त्रीमुख्यैः वेदाऽनभिरौ वैदिकैरपिसर्वैः समनुष्ठेया वर्तते। अपि च अस्यां कल्पद्वयमस्ति, मूलमंत्रेणैवपूजनं तान्त्रिकश्लोकैरपि पूजनमिति।

यथा- प्रथमकल्पः

**विद्यासुश्रुतिरुत्कृष्टा रुद्रैकादशी श्रुतौ।**
**तत्र पञ्चाक्षरस्तत्र "शिव" इत्यक्षरद्वयम्॥**
**तस्मादधिकृतां वेदे तत्रानधिकृतामपि।**
**मदीयमूलमन्त्रेण पूजनं सर्वतो परम्॥** [8]

द्वितीयक्रमस्तु- अनुष्टेयमानोऽर्थः येषु येषु आगमश्लोकेषु प्रकाशते तान्येव पठनपूर्वकं करणीया पूजा।

**यथा समनुष्टीयमानोऽर्थो येषु येषु प्रकाशते।**
**तेष्वेव पठ्यमानेषु चित्तं कृत्योऽनुरज्यते॥**[9]।

महतीपूजा- इयमेव षट्स्थलानुसरणात् षट्स्थलपूजेति, दीर्घकालाचरणात् अथवा दैर्घ्यत्वात् महतीति, लिंगाङ्गसामरस्य प्राप्तरूपत्वाच्च समरसीपूजेति च कथ्यते। प्रबोधविधेरारभ्य स्नानन्तान्हिकं निर्वर्त्यानंतरं सस्थलपूजाऽरभ्यते।

संसारे प्रत्येकः जनः सुखं वाञ्छति। संसारे यावत् जीवाः जन्तवः प्राणीनः सन्ति तेषां सर्वेषां सुखे इच्छा भवति। इच्छायाः अनुकूलं यदस्ति तदेव सुखमस्ति, तत् येन रूपेण वा भवतु। कस्यापि धनरूपसुखस्य इच्छा भवति, कस्यापि पुत्ररूपसुखस्य इच्छा भवति, कस्यापि पत्नीरूपसुखस्य इच्छा भवति, कस्यापि विद्वतारूपसुखस्य इच्छा भवति, परन्तु एतत् आवश्यकमस्ति यत् यदेव इच्छानुकुलं भवति तदेव सुखमस्ति तदेव सर्वे वाञ्छन्ति। यथा क्षुधार्तः प्राणी भोजनं वाञ्छति तथैव सर्वे प्राणीनः स्वानुकूलं वस्तु वाञ्छन्ति। स्वानुकूलवस्तुनः प्राप्त्यर्थं नानाविधं प्रयत्नं कुर्वन्ति। सः कस्यापि सेवां करोति, केनापि सह अनुरागं करोति, केनापि सह कलहं करोति, व्यापारं करोति तथा कार्यमपि करोति। तस्य कृते यद्वा आवश्यकं सूच्यते स्वशक्त्यनुसारेण स्वस्य इष्टपूर्त्यर्थं प्रयत्नं करोति येन सह मनोनुकुलं वस्तु प्राप्तुं शक्नुयात्।

अभिलषितं वस्तु प्राप्त्यर्थं नानाविधमार्गाः सन्ति। तेषु मार्गेषु सर्वश्रेष्ठः वेदविहितः मार्गः भवति कार्मकाण्डमार्गः। साधारणः जनः स्वशक्त्यपेक्षया देवतायाः ऋषेः मुनेः आत्मजनानां शक्तिं अधिकं मनुते। अपि च तदुपरि विश्वासमपि करोति। मानवः स्वाभिलषितवस्तुनः प्राप्त्यर्थं स्वशक्त्यपर्यन्तं प्रयत्नं करोति किञ्च सः यदा सफलः न भवति तदा दैवशक्तिं प्रति धावन्ति अपि च स्वस्य पूज्यजनेभ्यः सम्पत्तिमपि स्वीकुर्वन्ति। अस्माकं ऋषिणां मुनीनां च समीपं गत्वा पृच्छन्ति किञ्च दुःखनिवृत्तिपूर्वकतया सुखस्य कामनां कुर्वन्ति, तदा मुनयः ऋषयः कृपां कुर्वन्तः वदन्ति। ततः परं मानवः अभिलषितवस्तुनः प्राप्तिः सम्भवति। भारतीयधर्मशास्त्रे एवंविध नैकानि उदाहरणानि प्राप्यन्ते।

एवमेव मया सारल्येन स्कन्दपुराणानुसारं शिवपूजापद्धतीनां वर्णनां कृत्वा यथाविधि शोधपत्रमिदं लिखितम्।

## सन्दर्भग्रन्थसूची


1. https://hindi.webdunia.com/article/ganesh-utsav
2. https://hi-in.facebook.com/mahanttrilokgi/posts/4201222043337782
3. https://www.facebook.com/mantarsadhna/photos/a.397228310676369/1236002720132253/?type=3
4. https://m.facebook.com/Shriramjyotishsadan/posts/468514733343085/
5. का . आ . च.प., 4, 5
6. Wikisource.org
7. कारणागम, क्रियापाद, 8.4
8. का.आ., अ.प. 4, 5
9. का.आ.अ.प.


## परिशीलितग्रन्थसूची


1. भारतीयदर्शनम्, डा. उमेश मिश्र, हिन्दी भवन लखनऊ, संस्करण–1975
2. भारतीयदशणनम्, डा. शिवबालक द्विवेदी, अभिषेकप्रकाशन–1990
3. स्कन्दपुराणम्, गीताप्रेस गोरखपुर–2002
4. संस्कृतसाहित्य का इतिहास, ए.बी. कीथ. मङ्गलदेवशास्त्री–1967
5. संस्कृतसाहित्य का इतिहास, डा. शिवबालक द्विवेदी, ग्रन्थप्रकाशन, कानपुर–1991